# Kailasavarnanam 4

# કૈલાસવર્ણનમ્ ૪

## Document Information

Text title : Kailasavarnanam 4

File name : kailAsavarNanam4.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 24 - kailAsavarNane gaNeshakRitastutiH | 1-28||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસવર્ણનમ્ ૪

(કૈલાસશૈલે ગણેશગોપુરવર્ણનમ્ ૪)

સ્કન્દઃ-

પશ્ચાદ્ભાગે હરિજ્યોતિહરિન્મણિવિરાજિતમ્ ।
પઞ્ચલક્ષપ્રમાણેન પ્રાકારં મણિગોપુરમ્ ॥ ૧॥

મહામરકતૈઃ ક્લૃપ્તગવાક્ષાવલિભિર્યુતમ્ ।
અષ્ટાશીતિ સહસ્રાણિ યોજનૈઃ પરિકલ્પિતમ્ ॥ ૨॥

પશ્ચાદ્ભાગે તુ તદ્યોતિ હરિન્મણિનિભા દિશઃ ।
તત્ર ગારુત્મતમણીક્લૃપ્તમણ્ડપશોભિતમ્ ॥ ૩॥

ઉદ્યદિન્દકરસ્વચ્છનિર્યજ્ઝરિભિરાવૃતમ્ ।
તત્રાચ્છસ્ફટિકોદ્દામસિહ્માસનશતૈર્વૃતમ્ ॥ ૪॥

ધૂપદીપાદિબહુલં નાનાસુમનાવૃતમ્ ।
મણિમાણિક્યખચિતમણ્ડપે સ્વાસ્તૃતાસને ॥ ૫॥

તસ્મિંસ્તિષ્ઠતિ વિશ્વેશસ્સ્વગણૈરર્ચિતાઙ્ઘ્રિકઃ ।
સપ્તલક્ષગણેન્દ્રૈશ્ચ વિઘ્નાદ્રિકુલિશો મહાન્ ॥ ૬॥

નાનારત્નચિતાનેકભૂષણૈઃ પરિશોભિતઃ ।
સિન્ધૂરવિલસદ્ભાલો મહાસિન્ધૂરવક્ત્રકઃ ॥ ૭॥

માણિક્યમુકુટોદ્ભાસિભાલચન્દ્રવિરાજિતઃ ।
શુણ્ડાદણ્ડમહોચ્ચણ્ડબૃહ્મિતાનન્દિતામ્બરઃ ॥ ૮॥

કુમ્ભાન્તરલલન્મુક્તાગુચ્છસચ્છાયિતાસ્યકઃ ।
કર્ણપત્રમણિભ્રાજચ્ચલત્કર્ણયુગછવિઃ ॥ ૯॥

દન્તાવલિમહારત્નદન્તવેષ્ટનસુન્દરઃ ।
તદધસ્તાલ્લલન્મુક્તામણિપત્રવિરાજિતઃ ॥ ૧૦॥

સિતભસ્મત્રિપુણ્ડ્રાઙ્કુકુમ્ભમધ્યવિરાજિતઃ ।
સિન્ધૂરતિલકોત્ફુલ્લવદનાનન્દશોભિતઃ ॥ ૧૧॥

મુક્તાગુમ્ફિતકર્ણાગ્રવીજિતોડ્ડીનષટ્પદઃ ।
સ્રવત્કટતટોદ્ભાસિ મદગન્ધિતદિક્તટઃ ॥ ૧૨॥

શિવપાદામ્બુજધ્યાનાનન્દોન્મીલિતલોચનઃ ।
ગણસન્દર્શનાનન્દસદોન્મીલિતલોચનઃ ॥ ૧૩॥

મહાનાગનિબદ્ધોરુપિઠરોદરસંયુતઃ ।
ફુલ્લપદ્મામલપદસ્સુરાસુરગણાનતઃ ॥ ૧૪॥

પાશાઙ્કુશરદધોતિમોદકાસક્તસત્કરઃ ।
રત્નાઙ્ગદૈશ્ચ કેયૂરૈર્ભ્રાજત્કરિકરપ્રભઃ ॥ ૧૫॥

પાદક્રમરણત્સિઞ્જદ્રત્નમઞ્જીરશોભિતઃ ।
દિવ્યાઙ્ગરાગસુભગો મણિહારામ્બરાવૃતઃ ॥ ૧૬॥

પાર્શ્વદ્વયવિરાજચ્છ્રીસિદ્ધિબુદ્ધિવિરાજિતઃ ।
સર્વાભરણભૂષાભ્યાં સેવિતઃ પાર્શ્વર્દ્વયોઃ ॥ ૧૭॥

ગણેન્દ્રૈશ્છત્રદણ્ડોદ્યન્મણિચામરસત્કરૈઃ ।
સેવિતશ્શ્રીગણેશાનસ્તસ્મિન્કૈલાસમણ્ડપે ॥ ૧૮॥

ચલચ્ચામરવાતૈશ્ચ ચલત્કર્ણાગ્રચામરાઃ ।
તાદૃશા ગણપાસ્તત્ર પાશાઙ્કુશધરાસ્તથા ॥ ૧૯॥

મહાબલા મહોત્સાહાઃ કુઠારવરપાણયઃ ।
સિન્ધૂરારુણભાલાગ્રાસ્ત્રિપુણ્ડ્રપરિશોભિતાઃ ॥ ૨૦॥

રક્ષન્તિ તે ગણાસ્તત્ર પ્રાકારં તચ્ચ ગોપુરમ્ ।
સપ્તલક્ષામિતવલા ગણેશા ગણપાસ્તથા ॥ ૨૧॥

તત્રૈવ દેવદેવસ્ય શાસનાચ્ચન્દ્રમૌલિનઃ ।
ગણેશોઽપિ સદા ધ્યાયન્ ગણેશેશ્વરપૂજકઃ ॥ ૨૨॥

તત્રેષ્ટલિઙ્ગં તસ્યૈવ વરપ્રાકારગોપુરમ્ ।
નવરત્નચિતન્દિવ્યં મણિસ્તમ્ભચિતાન્તરમ્ ॥ ૨૩॥

ગણેશ્વરાખ્યં તલ્લિઙ્ગં મણિધામગતં તથા ।
પ્રોદ્યત્કુમ્ભપતાકાગ્રપવનાધૂતસાઞ્ચલમ્ ॥ ૨૪॥

સ્વપુષ્કરધૃતોત્તુઙ્ગકુમ્ભપઞ્ચામૃતૈરપિ ।
સુધાધારાભિરાસિચ્ય ચન્દનાલેપિસુન્દરમ્ ॥ ૨૫॥

ફણામણિમહામૌલિરત્નાભરણશોભિતમ્ ।
સોઽર્ઘસમ્પૂજયત્યેવ બિલ્વમન્દારચમ્પકૈઃ ॥ ૨૬॥

દૂર્વાભિઃ કમલૈરીશં ધૂપૈર્દીપૈર્મનોહરૈઃ ।
નૈવેદ્યૈર્વિવિધૈશ્ચૈવ તામ્બૂલૈશ્છત્રચામરૈઃ ॥ ૨૭॥

ગાનૈર્નૃત્યૈર્મૃદઙ્ગાબ્જકાહલાનાઞ્ચ નિસ્વનૈઃ ।
ભસ્મરુદ્રાક્ષસમ્પન્નસ્સ્તૌતિ દેવં મહેશ્વરમ્ ॥ ૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલે ગણેશગોપુરવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૪ - કૈલાસવર્ણને ગણેશકૃતસ્તુતિઃ । ૧-૨૮॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 24 - kailAsavarNane gaNeshakRRitastutiH . 1-28..

Notes:
Skanda સ્કન્દ describes about the residence of Gaṇeśa ગણેશ towards the Western region of Mount Kailāsa કૈલાસ શૈલ, that has predominance of Emerald - viz. Harinmaṇi હરિન્મણિ / Marakatamaṇi મરકતમણિ / Garutmatmaṇi ગરુત્મત્મણિ; and mentions about the Gaṇeśvara Śivaliṅga ગણેશ્વર શિવલિઙ્ગ that He worships there.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasavarnanam 4*
pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*